# শ্রীরাজরাজেশ্বরী চূর্ণিকা

{॥ শ্রীরাজরাজেশ্বরী চূর্ণিকা ॥}

শ্রীমত্ কমলাপুর কনকধরাধরবর নিরুপম পরম পাবন

মনোহর প্রান্তে, সরসিজভবোপম

বিশ্বংভরামরবর্গগনিগ্গলৎসসংভ্রম গুংভানুগুংভ নিরন্তর

পঠ্যমান নিখিল নিগমাগম শাস্ত্র পুরাণেতিহাস কথানির্মল

নিনাদসমাক্রান্তে ॥ ১॥

তত্র প্রবর্দ্ধিত

মন্দার-ময়ূর-খর্জুর-কোবিদার-জংবীর-জংবূ-

নিংব-কদংবোদুংবর-সাল-রসাল-তমাল-তক্কোল-হিন্তাল-

নাঌিকের-কদলী-ক্রমুক-মাতুলুংগ-নারংগ-লবংগ-বাদরী-

চংপকাশোক-পুন্নাগাগরুচন্দন-কুরুবক-মরুবক-বেলদ্রাক্ষা-

মল্লিকা-মালতী-মাধবীলতা-শোভায়মান-পুষ্পিতফলিত-ললিত

বিবিধ বনতরুবাটিকা মধ্যপ্রদেশে ॥ ২॥

শুকপিকশারিকা নিকরময়ূর চকোর চক্রবাক

ভরদ্বাজ-পিংগল-টিট্টিভ-গরুঢ-বিহগকুলায়ন কোলাহলারব

পরিপূরিতাশে, তত্র সুধারসোপম-পানীয়কাসার স্ফুটকলিত

কুমুদেন্দীবরষণ্ড-সঞ্চরন্মরাল চক্রবাক কারণ্ডব প্রমুখ

জলাণ্ডজমণ্ডলী শোভায়মানে, নন্দনবন কৃতবহুমানে ॥ ৩॥

Stotram Digitalized By Sanskritdocuments.org

চারুচামীকর প্রাকারগোপুর বলযিতে, সুলঌিতে,

সুস্নিগ্ধবিরাজিত বজ্রস্তংভ সহস্রপত্মরাগপলফলক

জাতরূপস্রতন নির্মিত প্রথমমণ্তপ-

দ্বীতীযমণ্টপান্তরাঌমণ্টপ মূলমহামণ্টপস্থানে,

শিল্পিশাস্ত্রপ্রধানে,

কলিতবজ্রবৈঢূর্য-মাণিক্য-গোমেতক-পুষ্পরাগ-

পত্মরাগ-মরকত-নীল-মুক্তা-প্রবাঌাখ্য

নবরত্নতেজোবিরাজিত বিন্দুত্রিকোণ ষটেকাণবসুকোণ শ্রীচক্রস্বরূপ

ভদ্রসিংহাসনাসীনে, দেবতাপ্রধানে ॥ ৪॥

চরণাংগুঌিনখমুখরুচিনিচয পরাভ্রততারকে, শ্রিমন্মাণিক্য

মংজীরমণ্ডিত শ্রীপদাংবুজদ্বযে, মীনকেতনমণি

তুণীরবিলাসবিজযিজংঘাযুগঌে, কনকরংভাস্তংভিতোরুদ্বযে,

কন্দর্পস্বর্ণস্যন্দনপটুতর শকটসন্নিভনিতংব বিংবে ॥ ৫॥

দিনকরোদযার্ধবিকসিতারবিন্দনাভিপ্রদেশে,

রোমরাজীবিরাজিতবঌিত্রযে, ভাসুরকরভোদরে,

জংভাসুররিপুকুংভিকুংভসমুজ্জ্যংভিত শাতকুংভকুংভাযমান

সংভাবিতপযোধরদ্বযে, অদ্বযে, গোবিত কুশকলশ

কক্ষদ্বযারুণিত সূর্য পট্টাভিধানমুক্তামণিপ্রোত

কঞ্চুকবিরাজমানে, কোমঌতরকল্পবল্লীসমান

পাশাঙ্কুশবরাভয মুদ্রামুদ্রিতৎসন্তস্‌ণৎকার বিরাজিত

চতুর্ভুজে ॥ ৬॥

ত্রৈলোক্যজৈত্রযাত্রাগমনসুরবরকর বধমংগল্ঽসূত্র
ত্রিমেখাশোভিতকন্ডরে, নবপ্রবালবল্লবপক্কবিংবফলাধরে,
নিরন্তরকর্পূরতাংবূলচ্যর্বণারুণিতরদনপঙ্ক্তিদ্বযে,
চন্পকপ্রসূনতিলপুষ্পসমান
নাসাপুটাগ্রোদঞ্চিতমৌক্তিকাভরণে,
কর্ণাবতংসীকৃতেন্দিবরবিরাজিতকপোলভাগে,
অরবিন্দদল্ঽদীর্ঘলোচনে ॥ ৭॥

কুসুমশরকোডন্দলেখালঙ্কারি মনোহারিভৃলতাযুগল্ঽে,
সুলল্ঽিতাষ্টমীচন্দ্রলাবণ্যললাটফলকে, কস্তূরিকাতিলকে,
হরিন্মণিদ্বিরেফাবলি প্রকাশকেশপাশে, কনকাংগদহারকেযূর
নানাবিধাযুধ স্থিরীভৃতসৌদামিনী
তুলিতলল্ঽিতন্ত্রতনতন্ত্রলতে ॥ ৮॥

কাশ্যপাত্রি
ভরদ্বাজব্যাসপরাশর-মার্কণ্ডেয-বিশ্বামিত্র-
কণ্বকপিলগর্গপুলস্ত্যাগস্ত্যাদি
সকলমুনিমনোধ্যব্রহ্ম তেজোমযে, চিন্মযে ॥ ৯॥

সেবার্থাগতাংগ-বংগ-কলিংগ-কাংভোজ-সৌবীর-সৌরাষ্ট্র-

মহারষ্ট্র-মাগধ-নিষধ-চোল-চের-পাণ্ড্য-পাঞ্চাল-দ্রবিড-

দ্রাবিড-ঘোট-লাট-বরাট-কর্ণাটকান্ধ্র-ভোজ-কুরু-গান্ধার-

বিদর্ভ-বিজ্রুংভ-বাহ্লীক-বর্বর-কেরল়-কৈকয-কোসল-শূরসেন-

চ্যবন-টঙ্কণ-কোঙ্কণ-মৎস্য-মাধ্ব-সৈন্ধব-কাশী-ভদ্রাশী-

ঐন্দ্রাংশী-উত্তরগিরি-ষটপঞ্চাশত্-দেশাদীশাদি-গন্ধর্ব

হেষারবহীৎকারবরথাংগক্রেম্কারভেরী-ঝংকার মদ্বল়

ধ্বনিহুংকারযুক্ত চতুরংগসমেত জিতসুররাজাধিরাজ

পুংখানুপুংখগমনাগমন বিশীর্ণাভরণাদ্যযুত পাটলী

বালুকাযমান প্রথম মণ্টপ সন্নিধানে ॥ ১০॥

তত্তত্ পূজজাল

ক্রিযমানার্ঘ্য-পাদ্যাচমনীয-স্নান-বস্ত্রাভরণ-

জলগন্ধ-পুষ্পাক্ষত-ধূপদীপ-নৈবেদ্যতাম্বূল-

প্রদক্ষিণনমস্কার-স্তোত্রস্বান্ত

সন্তোষিতবরপ্রদানশীলে, শ্রীবালে ॥ ১১॥

রম্ভোর্বশীমেনকা-তিলোত্তমা-হরিণী-ঘৃতাচী

মঞ্জুঘোষ-অলংবুসাদ্যুতাফ্সরস্ত্রী-"ধিমিন্ধিমিত"

চিত্রোপমিত্র নর্তনোল্লাসাবলোকনদ্বযে, কৃত্তিবাসঃপ্রিযে,

বণ্ডাসুর-প্রেরিতাখন্ডদোর্দুণ্ড রক্ষোমণ্ডলী খণ্ডনে ॥ ১২॥

নিজরাংগুল়ীযকাদি মৎস্য-কূর্ম-বরাহাদি নারাযণ

দশাবতারে, হিমবৎকুলাচলরাজকন্যে, সর্বলোকমান্যে ॥ ১৩॥

শ্রী বিদ্যাধীশরচিত চূর্ণিকশ্রবণপঠনানন্দিনাং

সম্প্রার্থিতাযুরারোগ্যসৌন্দর্য বিদ্যাবুদ্ধি পুত্রপৌত্র

কলত্রৈশ্বর্যাদি সকলসৌখ্যপ্রদে ,

শ্রীমৎকমলাম্বিকে ! পরাশক্তে !

নমস্তে ! নমস্তে ! নমস্তে !

মুক্তাবিদ্রুম হেমকুণ্ডলধরা সিংহাধিরূঢা শিবা ।

রক্তাংভোজসমানকান্তি বদনা শ্রীমৎকিরীটান্বিতা ॥

মুক্তাহেমবিচিত্রহারকটকৈঃ পীতাংবরা শঙ্করী ।

ভক্তাভীষ্টবরপ্রদানচতুরা মাংপাতু হেমাম্বিকা ॥

॥ শ্রী বিদ্যাধীশ বিরচিত শ্রী রাজরাজেশ্বরী চূর্ণিকা

সমাপ্তা ॥

Encoded and proofread by

Antaratma antaratma at Safe-mail.net

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Rajarajeshwari Churnika Lyrics in Bengali PDF
% File name : rAjarAjeshvarIchUrNikA.itx
% Location : doc_devii
% Author : shrii vidyaadhiisha
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Antaratma antaratma at Safe-mail.net
% Proofread by : Antaratma antaratma at Safe-mail.net
% Latest update : September 1, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 14, 2015 ] at Stotram Website